संस्कृतवार्ताः

18.05.2025

सायम् :- 6:20

## मुख्यवार्ता:

- तेलङ्गानायाम् अद्य प्रातः हैदराबादस्य आवासीयक्षेत्रे दुरापादिते अग्नि-काण्डे सप्तदश जनाः मृताः, प्रधानमंत्री नरेन्द्र मोदी, राष्ट्रपति द्रौपदी मुर्मु: च संवेदना प्रकिटतवन्तौ।
- केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् नरेन्द्रमोदिनः प्रशासनेन विगतेषु दशवर्षेषु विभिन्नाभिः योजनाभिः स्वास्थ्यक्षेत्रे अभूतपूर्व-परिवर्तनानि कृतानि।
- सप्त सर्वदलीय प्रतिनिधिमण्डलं आतङ्कवादं विरुद्धं सिन्दूराभियान-विषये विस्तृतसूचनाः प्रदानाय शीघ्रमेव द्वात्रिंशत्-प्रमुखदेशानां यात्रां करिष्यति।
- महाराष्ट्रे केन्द्रीयकृषिमन्त्री शिवराजसिंहचौहानः एकराष्ट्रैककृषेः एकदलस्य च लक्ष्यं प्राप्तुं कृषिक्षेत्रे आई.सी.ए.आर. तथा अन्येषां हितधारकाणां समन्वयस्य आह्वानं कृतवान्।
- इण्डियन-प्रीमियर-लीग् इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् जयपुरस्थे सवाई मानसिंह-क्रीडांगणे पंजाबकिंग्स दलेन विंशत्यधिक द्विशत धावनांकानां लक्ष्य राजस्थान रॉयल्स दलस्य सम्मुखे स्थापितम्।

## तेलङ्गनायाम् अग्निकाण्डः

तेलङ्गानायाम् अद्य प्रातः हैदराबादस्थे चारमिनारस्य समीपे आवासीयक्षेत्रे दुरापादिते अग्नि-काण्डे सप्तदश जनाः मृताः, अनेके च व्रणिताः। मृतकेषु अष्ट बालकाः सन्ति ये सप्तवर्षाणि यावत् आसन् अपि च षट् महिलाः सन्ति । व्रणिताः समीपस्थेषु विविधचिकित्सालयेषु स्थानान्तरिताः सन्ति। गुलजार हाउस् क्षेत्रे ग्राउण्ड्-प्लस्-टू-भवने अग्निः काण्डः अभवत्। भूतले अग्निः प्रज्वलितः, पश्चात् उपरि-तलद्वयं यावत् प्रसृतः । तेलंगाना-आपत्-प्रतिक्रिया-अग्निसेवा-विभागस्य डीजी वाई नागी रेड्डी इत्यनेन उक्तं यत् एकादश अग्निशमन वाहनानि, एकः रोबोटः च तत्क्षणमेव सेवायां नियोजितः।

अग्निकाण्डस्य कारणम् अधुनापि न ज्ञातं, कारणस्य अन्वेषणाय आरक्षीबलम् सूचितम्। केन्द्रीय-कृष्णाङ्गार-खनि-मन्त्री जी किशन रेड्डी इत्यसौ घटनास्थलं गत्वा प्रभावितेभ्यः परिवारेभ्यः सर्व-विध-साहायतानाम् आश्वासनं प्रदत्तवान्। मुख्यमन्त्रिणा रेवन्तरेड्डी वर्येण प्रभावितजनेभ्यः उत्तमचिकित्सासहायताप्रदानार्थं सर्वविधोपायान् कर्तुं च अधिकारिणञ निर्दिष्टाः। प्रधानमन्त्री नरेन्द्रमोदी उक्तवान्, अग्निकाण्डेन प्राणहानिना सः अतीव दुःखमनुभवति। सामाजिकान्तर्जालीयसन्देशे सः प्रभावित-परिवाराणां कृते शोकं प्रकटितवान्। सः प्रत्येकस्य मृतकस्य परिवारस्य कृते द्विलक्षरूप्यकाणां अनुग्रहराशेः घोषणां कृतवान् । व्रणितानां कृते च पञ्चाशत् सहस्ररूप्यकाणि प्रदत्तानि भविष्यन्ति।

## अमितशाह- अहमदाबाद-

केन्द्रीयगृहमन्त्री अमितशाहः उक्तवान् यत् नरेन्द्रमोदिनः प्रशासनेन विगतेषु दशवर्षेषु विभिन्नाभिः योजनाभिः स्वास्थ्यक्षेत्रे अभूतपूर्व-परिवर्तनानि कृतानि। गुजरातस्य मेहसाना-मण्डलस्य गोजरियायाः केके पटेलस्य मधुबेन के पटेलस्य च नर्सिंग-महाविद्यालयस्य नवनिर्मितस्य भवनस्य उद्घाटनं कुर्वन् श्रीशाहः अवदत् यत् अस्मिन् चिकित्सा-महाविद्यालये वर्धितानां सौविध्यानां कृते समीपस्थग्रामाणां बहवः निर्धनरोगिणः लाभान्विताः भविष्यन्ति। सः अवदत् यत् देशस्य षष्टिकोटिः नागरिकाः आयुष्मान-भारतयोजनया लाभन्विताः सन्ति। विगतेषु दशवर्षेषु एम्स चिकित्सालयस्य च संख्या सप्ततः त्रयोविंशतिः यावत् वर्धिता अस्ति ।

इतः पूर्वं केन्द्रीय-गृहसहकारितामन्त्री अमितशाहः परिसमाप्तस्य प्राथमिक-कृषिऋणसङ्घस्य आर्थिक-पुनरुत्थानस्य उद्देश्यान्तर्गतं नूतननीतेः योजनानां घोषणां कृतवान्। अहमदाबादस्य विज्ञाननगरे गुजरात-राज्यसहकारी-सङ्घेन आयोजितं सहकारि-सम्मेलनं सम्बोधयन् श्रीशाहः पैक्सं इत्येनं पुनः सजीवं कृत्वा देशे सहकारि-संरचनानां सुदृढीकरणाय सर्वकारस्य प्रतिबद्धतायां बलं प्रदत्तवान्। सः ऊनविंशत्यधिक-द्विसहस्रतम-वर्षं पर्यन्तं देशे सर्वत्र प्रत्येकस्मिन् पंचायते पीएसीएस इत्यस्य स्थापनस्य सर्वकारस्य महत्त्वाकांक्षी लक्ष्यं अपि वर्णितवान् । सहकारिणां मध्ये सहकार्यस्य सिद्धान्ते सर्वकारस्य ध्यानं प्रकाशयन् श्रीशाहः अवदत् यत् एतेन उपक्रमेण सहकारि-निक्षेपेषु एकादशसहस्रकोटिरूप्यकाणां वृद्धिः अभवत्। अस्मिन् आयोजने राज्यस्य अष्टशतं यावत् सहकारिणां प्रतिनिधित्वेन चतुःसहस्राधिकानां सहकारीनेतृणां सहभागिता अभवत् । गुजरातस्य द्विदिवसीययात्रायां श्रीशाहः अहमदाबाद-मेहसाना-नगरयोः अन्येषु कतिपयेषु कार्यक्रमेषु अपि भागं भजिष्यति।

## सप्त सर्वदलीय प्रतिनिधिमण्डलं

सप्त सर्वदलीय प्रतिनिधिमण्डलानि आतङ्कवादं विरुद्धं सिन्दूराभियान-विषये विस्तृतसूचनाः प्रदानाय शीघ्रमेव प्रमुखदेशानां यात्रां करिष्यन्ति। संसदीयकार्याणां मन्त्री किरेन् रिजिजू ह्यः अंतर्जालीय पटल संदेश माध्यमेन प्रतिनिधिमण्डलानां सम्बद्धानां सांसदानां विषये सूचनां प्रदत्तवान्। भारतीयजनतापार्टीति दलस्य सांसदः बैजयंत पाण्डा वर्यस्य नेतृत्वे प्रतिनिधिमण्डलं सऊदी अरब, बहरीन, कुवैत, अल्जीरिया चेति देशं प्रति गमिष्यति। प्रतिनिधिमण्डले भाजपादलस्य-सांसदः निशिकांत दूबे तथा ए.आई.एम.आई.एम. इति दलस्य सांसदः असदुद्दीन ओवैसी च स्तः। संसदीयकार्याणां मन्त्री किरेन् रिजिजू प्रोक्तवान् यत् सप्त प्रतिनिधिमण्डलानि शीघ्रमेव प्रमुखदेशैः सह परिचर्चां करिष्यन्ति । सः अवदत् यत् एषः पदक्षेप: आतङ्कवादं विरुद्धं सामूहिकसंकल्पत्वेन दृश्यते । एकस्मिन् सामाजिक पटल माध्यमेन रिजिजू-महोदयेन अस्य संयुक्तदलस्य सांसदानां-प्रतिनिधिमण्डलीय सदस्यानां सूची प्रख्यापिताऽस्ति । ऊनषष्टिः सांसदयुक्ताः सप्त समूहाः द्वात्रिंशत् देशाणां यात्रां करिष्यन्ति। प्रत्येकस्मिन् प्रतिनिधिमण्डले एकः सेवानिवृत्तः राजनायक: अपि भविष्यति।

## ऋतुसञ्चेतना

ऋतुविज्ञानविभागेन अद्य असम-राज्ये, मेघालये, दक्षिण आन्तरिक कर्नाटके च अतीव प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। तत्र उक्तं यत्, अद्य त्रिपुरा, अरुणाचलप्रदेश, तटीय-कर्नाटक, केरल, तमिलनाडु, पुडुचेरी, तेलंगाना, दक्षिणमध्यमहाराष्ट्र, पश्चिमबङ्ग, सिक्किम, बिहार राज्येषु च अत्यधिकवृष्टिः भविष्यति। मराठवाडा, गुजरात, कोङ्कन, गोवा इत्येतेषु वज्रपातेन, विद्युच्-पातनेन, तीव्रवायुना सह वृष्टेः सम्भावना विद्यते। जम्बवां, उत्तर प्रदेशे, राजस्थाने उत्तर-मध्य-प्रदेशे च ताप-तरंगस्य स्थितेः अपेक्षास्ति। विभागेन अद्य पूर्वमध्यप्रदेशे रात्रौ उष्णस्थितेः पूर्वानुमानं कृतम् अस्ति।

## नागपुर-शिवराजसिंहचौहानः

महाराष्ट्रे केन्द्रीयकृषिमन्त्री शिवराजसिंहचौहानः एकराष्ट्रैककृषेः एकदलस्य च लक्ष्यं प्राप्तुं कृषिक्षेत्रे ICAR तथा अन्येषां हितधारकाणां समन्वयस्य आह्वानं कृतवान्। श्रीचौहानः नागपुरस्य सुरेशभाट सभागारस्य विकसितकृषि संकल्पाभियानस्य विषये हितधारक-परामर्शे विदर्भक्षेत्रस्य कृषकैः सह संवादं कुर्वन् आसीत्। महाराष्ट्रस्य मुख्यमंत्री देवेन्द्र फडणवीसः, राज्य-कृषि-मंत्री एड. माणिक-कोकाटे च अस्मिन् अवसरे उपस्थितौ आस्ताम् । श्रीचौहानः अवदत् यत् प्रयोगशालाभूम्योः मध्ये अन्तरं पूरयितुं सर्वकारः प्रतिबद्धः अस्ति। सः अवदत् यत् कृषिविस्तारपदाधिकारिभिः सह आईसीएआर-वैज्ञानिकाः एकसमूहरूपेण ग्रामेषु गत्वा कृषकान् बीजानां नूतनानां विविधतानां विषये कृषिक्षेत्रे नूतनानां नवीनतानां च विषये शिक्षयिष्यन्ति।

## आईपीएल

इण्डियन-प्रीमियर-लीग् इत्येतस्यां क्रिकेट-स्पर्धा-मालिकायाम् जयपुरस्थे सवाई मानसिंह-क्रीडांगणे पंजाबकिंग्स दलेन विंशत्यधिक द्विशत धावनांकानां लक्ष्य राजस्थान रॉयल्स दलस्य सम्मुखे स्थापितम्। अपरे द्वन्द्वे सायं सप्तवादने दिल्ली कैपिटल्स-गुजरात टाइटंस इत्येतयोः दलयोः मध्ये दिल्लीस्थे अरूण-जेटली-क्रीडागणे द्वन्द्वं भविष्यति। गतरात्रौ 'कोलकाता-नाइटराइडर्स'- 'रॉयल चैलैन्जर्स-बैंग्लोर' इत्येतयोः दलयोः मध्ये समायोजितं द्वन्द्वं वर्षाकारणेन बाधितं, स्थगितञ्च, एतेन सह कोलकाता-नाइट-राइडर्स इति दलं प्रतिस्पर्धातः बहिर्भूतम्।

।। इति वार्ता: ।।